सूत्रार्थः—[ये यजमानास्ते ऋत्विजः=जो यजमान हैं वे ऋत्विक् होते हैं इस] (वचनात्) वचन से राजन्य और वैश्य भी ऋत्विक् होंगे (इति चेत्) ऐसा कहो तो ।

व्याख्या—यदि यह समझते हो कि राजन्य और वैश्य का कर्म वैगुण्य को प्राप्त होता है तो वचन से यजमान होते हुए ऋत्विक् हो जायेंगे—ये यजमानास्ते ऋत्विज (=जो यजमान हैं वे ऋत्विक् होते हैं । यजमान कौन हैं ? जो सत्र के फल की कामना करते हुए सत्रकर्म में प्रवृत्त हुए । वे राजन्य भी और वैश्य भी [हो सकते हैं] । उनके ऋत्विक्कर्म का

---

१. 'तत्र फलं' इति काशीमुद्रिते-पाठः ।

मृत्विक्कर्म विधीयते। तत्रैतत् स्यात्—येषामार्त्विज्यं शक्यं कर्तुं तेषामेव तद्ब्राह्मणानां शक्यम्। प्रतिषिद्धं हि राजन्यवैश्यानां, न तेषामिदमार्त्विज्यविधानमिति। नैतदेवम्। यथैव ब्राह्मणानां यजमानानामप्राप्तं वचनप्रामाण्याद् भवति, एवमब्राह्मणानामपि यजमानानां वचनप्रामाण्यादेव भवितुमर्हतीति। तस्मादार्त्विज्यसंस्कृता राजन्यवैश्या अपि सत्रमासीरन्निति ॥१९॥

न स्वामित्वं हि विधीयते ॥२०॥ (आ० नि०)

नैतदेवम्। स्वामित्वमनेन वचनेन विधीयते—एवंकामाः सत्रमासीरन्निति विधीयते, नाऽऽर्त्विज्यम्। अथ ये यजमानास्त ऋत्विज इत्यनेन वचनेन विहितमार्त्विज्यमिति। उच्यते। तदपि न। कथम्? नात्रैषा वचनव्यक्तिः—ये यजमाना इत्युद्देश्यपदम्, ऋत्विज इति विधेयपदम्। तथा हि सति आर्त्विज्यमङ्गं यजमानसंस्कारकं विधीयेत, न यजमाना आर्त्विज्यस्याङ्गम्। तत्र प्राकृतार्थता नैषामार्त्विज्यानां स्यात्,

---

विधान किया जाता है। (आक्षेप) उस स्थिति में यह होगा—जिनका ऋत्विक्कर्म करना संभव है उनका ही [अधिकार होगा]। यह (=आर्त्विज्य करना) ब्राह्मणों का ही सम्भव है, राजन्यों और वैश्यों का [आर्त्विज्यकर्म] प्रतिषिद्ध है। यह (=राजन्यों और वैश्यों) के ऋत्विक्कर्म का विधान नहीं है। (समाधान) ऐसा नहीं है। जैसे ब्राह्मण यजमानों का अप्राप्त [ऋत्विक्कर्म] वचनप्रामाण्य से [विहित] होता है, इसी प्रकार अब्राह्मण यजमानों का भी वचन के प्रामाण्य से ही [ऋत्विक्कर्म का विधान] योग्य है। इससे ऋत्विक्कर्म से संस्कृत राजन्य और वैश्य भी सत्र में बैठें अर्थात् उनका सत्र में अधिकार है ॥१९॥

न स्वामित्वं हि विधीयते ॥२०॥

सूत्रार्थः—(न) ऐसा नहीं है। (स्वामित्वम्) सत्र विधायक वचन से सत्र करने वालों का स्वामित्व अर्थात् यजमानत्व का (हि) ही (विधीयते) विधान किया जाता है, आर्त्विज्य का विधान नहीं किया जाता है।

व्याख्या—ऐसा नहीं है [अर्थात् राजन्यों और वैश्यों के ऋत्विक्कर्म का विधान नहीं किया है]। इस वचन से स्वामित्व का विधान किया जाता है—इस प्रकार की कामनावाले सत्र में बैठें, ऐसा विधान किया जाता है, आर्त्विज्य का विधान नहीं किया जाता है। (आक्षेप) ये यजमानास्त ऋत्विजः इस वचन से [राजन्य और वैश्य यजमानों का भी आर्त्विज्य कहा है। (समाधान) यह भी नहीं है। कैसे? यहां ऐसी वचन की व्यक्ति (=स्वरूप) नहीं है ये यजमानाः यह उद्देश्य पद और ऋत्विजः यह विधेय पद। इस प्रकार की [वचन-व्यक्ति] होने पर आर्त्विज्यरूप अङ्ग यजमान का संस्काररूप विहित किया जाये, यजमान आर्त्विज्य के अङ्ग-रूप विहित नहीं किये जायें। उस अवस्था में इन ऋत्विक्कर्मों की प्राकृतार्थता (=प्रकृति में निर्दिष्ट प्रयोजनता) न होवे और अदृष्ट संस्कार की कल्पना भी करनी पड़े और वह (=

संस्कारश्चादृष्टः कल्प्येत। स च यजमानविषय इति पुनरदृष्टम्। तस्मान्न यजमानानां सतामार्त्विज्याः पदार्था विधीयन्ते। किं तर्हि? आर्त्विजानां पदार्थानामनन्यकर्तृकता। एषा च वचनव्यक्तिः[1] य ऋत्विजस्ते यजमाना इति। अत्र ऋत्विज इत्युद्देश्यपदं, यजमानास्त इति विधीयते। ये यजमानास्त एव ऋत्विजो भवन्ति, नान्य इत्यार्त्विजेषु पदार्थेषु यजमानाः कर्तारो विधीयन्ते। प्रत्याम्नानाद् अन्ये निवर्तन्ते। एवं सति प्राकृतप्रयोजना एव आर्त्विजाः पदार्थाः। न यजमानसंस्कारोऽदृष्टो विधीयत इति। यजमानकर्तृकल्पनायामप्येषामदृष्टमिति यदि कल्प्येत, तत्र ब्रूमः। इतरस्मिन्नपि पक्षे यजमानविषयः सोऽदृष्टः संस्कार इत्यवश्यं कल्पनीयम्। यश्चोभयोः पक्षयोर्दोषो न तमेकश्चोद्यो भवति ॥२०॥

संस्कार) यजमान के विषय में, यह पुनः (=दूसरे) अदृष्ट की कल्पना करनी पड़े। इससे यजमान होते हुओं के आर्त्विज्य पदार्थ विधान नहीं किये जाते हैं। तो क्या विधान किया जाता है? ऋत्विक् संबन्धी पदार्थों की अनन्यकर्तृकता [अर्थात् ऋत्विक् सम्बन्धी पदार्थ यजमानों से भिन्न से नहीं किये जाते हैं]। वचन का यह स्वरूप है—य ऋत्विजस्ते यजमानाः (=जो ऋत्विक् हैं वे यजमान हैं)। यहां ऋत्विक् यह उद्देश्य पद है, यजमानास्ते इससे [ऋत्विजों के यजमानत्व का] विधान किया जाता है। 'जो यजमान हैं वे ही ऋत्विक् होते हैं, अन्य नहीं' इससे ऋत्विक् सम्बन्धी पदार्थों में यजमान कर्तारूप से विहित किये जाते हैं। प्रत्याम्नान (=विपरीत पाठ) से अन्य [यजमान] निवर्तित होते हैं। इस प्रकार (=विपरीत रूप से) विधान करने पर ऋत्विक् सम्बन्धी पदार्थ प्रकृति के प्रयोजनवाले ही होते हैं। यजमान का संस्काररूप अदृष्ट विधान नहीं किया जाता है [जैसा कि ऊपर दर्शाया है]। (आक्षेप) [ऋत्विक् सम्बन्धी पदार्थों के] यजमानकर्तृक कल्पना में भी यदि इनका अदृष्ट कल्पित किया जाये तो (समाधान) इस विषय में कहते हैं - दूसरे पक्ष में भी यजलान-विषयक वह अदृष्ट संस्कार अवश्य कल्पनीय होवे। जो दोनों पक्षों में दोष है, वह एक पक्ष में चोद्य (=आक्षेप योग्य) नहीं होता है।

विवरण – **एवंकामः** -- इससे सत्र के विभिन्न फलों की कामना वालों का निर्देश किया है। **ये यजमाना इत्युद्देश्यपदम्** – इसका तात्पर्य है – यजमानों को उद्देश्य करके ऋत्विक्त्व का विधान नहीं किया है। ऐसा करने पर ऋत्विक्त्व का विधान यजमान का संस्कारक होवे, उसमें यजमान प्रधान होगा आर्त्विज्य अङ्ग होगा। **तत्र प्राकृतार्थता नैषामार्त्विज्यानां स्यात्** —सत्र की प्रकृति ज्योतिष्टोम है। ज्योतिष्टोम में ऋत्विजों का जो प्रयोजन यागगत तत्तत् कार्य करनारूप कर्म हैं, वह आर्त्विज्य को यजमान का संस्कारक मानने पर उपपन्न नहीं होगा और ऋत्विक्त्व

---

१. अयं पाठः पूनासंस्करणे पाठान्तरत्वेन निर्दिष्टः। अयमेव पाठो युक्तः स्पष्टश्च। मुद्रितपुस्तकेषु तु 'ऋत्विज इत्युद्देश्य पदम्। त इति विधीयते।' इत्यपपाठः।

गार्हपते[1] वा स्यातामविप्रतिषेधात् ॥२१॥

के यजमान के संस्कारक होने पर दृष्ट फल के अभाव में अदृष्ट की कल्पना करनी पड़ेगी। और वह अदृष्ट भी यजमान गत मानना होगा। इस प्रकार दो अदृष्टों की कल्पना करनी पड़ेगी। **ये ऋत्विजस्ते यजमानाः** ऐसा वचन का स्वरूप मानने पर ऋत्विजों को उद्देश्य करके यजमानों का विधान होगा। **आर्त्विजेषु पदार्थेषु**—ऋत्विक् शब्द से **तस्येदम्** (अष्टा० ४।३।१२०) से सम्बन्धार्थ में अण् हुआ है। **प्रत्याम्नानात्**—'ये यजमानास्त ऋत्विजः' का विपरीत पाठ—**ये ऋत्विजास्ते यजमानाः** करने पर ऋत्विक् कर्म में यजमानों का विधान होने से जिनका ऋत्विक् कर्म नहीं हैं, उन राजन्य और वैश्य यजमानों की निवृत्ति हो जायेगी। इसका तात्पर्य यह है कि यथाश्रुत पाठ मानने पर=यजमानों को उद्देश्य करके ऋत्विक्त्व विधान करने पर **ऋद्धिकामाः सत्रमासीरन्** वचन से ऋद्धि की कामनावाले ब्राह्मण क्षत्रिय और वैश्य सभी यजमान प्राप्त होते हैं। उनमें ऋत्विक्त्व का विधान करने पर क्षत्रिय और वैश्य यजमान में ऋत्विक्त्व की प्राप्ति होने से उनका भी सत्र में अधिकार प्राप्त होता है। उद्देश्य विधेय के विपरीत कर देने से जो ऋत्विक् कर्म में विहित हैं उन्हीं का यजमानत्व होगा। ऋत्विक् कर्म केवल ब्राह्मण का विहित है। अतः सत्र में राजन्यों और वैश्यों की निवृत्ति हो जायेगी ॥२०॥

गार्हपते वा स्यातामविप्रतिषेधात् ॥२१॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त पक्ष की निवृत्ति करता है। सत्र में (गार्हपते) गृहपति सम्बन्धी कर्म में राजन्य और वैश्य अधिकृत (स्याताम्) होवें। (अविप्रतिषेधात्) राज्यन्य और वैश्य का प्रतिषेध न होने से अथवा विरोध न होने से।

विशेष—गार्हपते—गृहपति सम्बन्धी कर्म। यहां **पत्यन्तपुरोहितादिभ्यो यक्** (अष्टा० ५।१।१२८) से यक् प्रत्यय प्राप्त होकर 'गार्हपत्य' प्रयोग निष्पन्न होता है। यदि **तस्येदम्** (अष्टा० ४।३।१२०) से सामान्य सम्बन्ध अर्थ में प्रत्यय करें तो भी **दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः** (अष्टा० ४।१।८५) से ण्य प्रत्यय होकर भी गार्हपत्य प्रयोग बनता है। अतः यहां **तस्येदम्** अर्थ में **अपवादविषयेऽपि क्वचिदुत्सर्गः प्रवर्तते** (=अपवाद के विषय में भी कहीं-कहीं उत्सर्ग की प्रवृत्ति होती है) इस परिभाषा से 'ण्य' प्रत्यय के अपवाद विषय में उत्सर्ग अण् प्रत्यय जानना चाहिये। यथा—**तस्यापत्यम्** (अष्टा० ४।१।९२) अर्थ में **अत इञ्** (अष्टा० ४।१।९५) से अण् का अपवाद इञ् कहा है, पुनरपि **प्रदीयतां दाशरथाय मैथिलीम्** (रामा० ६।१४।३) में इञ् के स्थान में उत्सर्ग अण् देखा जाता है। शावरभाष्य के पूना संस्करण में सूत्र और भाष्य में **गार्हपते** के स्थान में **गार्हपत्ये** पाठान्तर मिलता है, वह लक्षणैकचक्षु मूढ

---

१. 'गार्हपत्ये वा' इति पाठान्तरम्।

गार्हपते[1] पदार्थे राजन्यवैश्यौ भविष्यतः। न च तत्राऽऽर्त्विजेन प्रयोजनम्। तस्मादविप्रतिषेधस्तेषामिति ॥२१॥

न वा कल्पविरोधात् ॥२२॥ (उ०)

न चैतदस्ति, गार्हपते वा पदार्थे राजन्यवैश्याविति। कल्पविरोधो हि स्यात्। यजमानचमसः सोममय एकेषां, फलमयचमस[2] एकेषाम्। तथा, ब्रह्मसाम बार्हद्गिरं ब्राह्मणानां, पार्थुरश्मं राजन्यानां, रायोवाजीयं वैश्यानाम्। तस्माद् गार्हपते निवेश इत्येतदपि नास्ति ॥२२॥

वैयाकरण द्वारा परिवर्तित प्रयोग प्रतीत होता है।

सुबोधिनीवृत्ति में 'गार्हपते वा स्यान्नामाविप्रतिषेधात्' पाठान्तर है। उसका अर्थ गृहपति सम्बन्धी कर्म में त्रैवर्णिक का अधिकार होवे, विरोध न होने से।

व्याख्या—गृहपति सम्बन्धी पदार्थ में राजन्य और वैश्य होंगे। वहां ऋत्विक्कर्म से प्रयोजन नहीं है। इससे उनका प्रतिषेध नहीं है ॥२१॥

न वा कल्पविरोधात् ॥२२॥

सूत्रार्थः—(न वा) यह नहीं है कि गृहपति सम्बन्धी कर्म में राजन्य और वैश्य होवें, (कल्पविरोधात्) कल्प का विरोध होने से। [कल्प का विरोध भाष्य में देखें।]

व्याख्या—यह नहीं है कि गृहपति के कर्म में राजन्य और वैश्य होवें। कल्प का विरोध होगा। किन्हीं (=ब्राह्मणों) का यजमान चमस सोममय होगा, दूसरों (=राजन्य वैश्यों) का फलचमस होगा। तथा ब्राह्मणों का बार्हद्गिर साम होगा, राजन्यों का पार्थुरश्म और वैश्यों का रायोवाजीय। इस [कल्प के भेद] से गृहपति के कर्म में [राजन्यों और वैश्यों का] निवेश होवे यह भी नहीं है।

विवरण—यजमानचमसः सोममय एकेषाम्—यज्ञ में जिस द्रव्य की प्रधान याग की आहुति दी जाती है उसका यजमान और ऋत्विजों के भक्षण का विधान है। सोमयाग में सोम का भक्षण 'चमस' पात्र द्वारा होता है। सत्र में तीनों के यजमान होने पर ब्राह्मण यजमान का चमस सोममय होगा। **फलचमस एकेषाम्**—राजन्य और वैश्य के यजमान होने पर उनको भक्षण के लिये सोम के स्थान पर बड़ की कोपल पीसकर दही में मिलाकर दिया जाता है—**स यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषेत् न्यग्रोधस्तिमीराहृत्य ताः संपिष्य दधनि उन्मृज्य तमस्मै भक्षं प्रयच्छेत् न सोमम्** (मी० ३।५।२२ के भाष्य में उद्धृत)। इस प्रकार राजन्य और वैश्य का चमस फलमय होगा। ब्रह्मसाम में वर्णभेद से सामभेद का पूर्व पृष्ठ १६४६-

---

१. 'गार्हपत्ये पदार्थे' इति पाठान्तरम्।

२. 'फलचयसमय एकेषाम्' इति पूनामुद्रितेऽपपाठः।

अथ यदुक्तम्—लिङ्गदर्शनादिति । तत्परिहर्तव्यम् । अत्रोच्यते—

स्वामित्वादितरेषामहीने लिङ्गदर्शनम् ॥२३॥ (उ०)

अहीनमेव सत्रशब्देन वक्ष्यति । यतः स्वामित्वमृत्विजां विधीयते । अत ऋत्विजां स्वामित्वाद् राजन्यवैश्यानां सत्रं नावकल्पत इति । तस्मादहीने लिङ्ग-दर्शनम् ॥२३॥ **सत्रेषु ब्राह्मणानामेवाधिकाराधिकरणम् ॥३॥**

[सत्रे वैश्वामित्रतत्समानकल्पानामेवाधिकाराधिकरणम् ॥४॥]

एतत् समधिगतं ब्राह्मणानामेव सत्रम्, न राजन्यवैश्यानामिति । अथेदानीमिदं संदिग्धम्—किं सर्वेषां ब्राह्मणानामुत वासिष्ठानां सः, उत भृगुशुनकवसिष्ठान् वर्ज-यित्वाऽन्येषामिति । किं प्राप्तम् ? सर्वेषामविशेषात् । न हि कश्चिद् विशेष आश्री-यते, अमीषां ब्राह्मणानां सत्रममीषां नेति । तस्मात् सर्वेषामिति । एवं प्राप्ते ब्रूमः—

१६४७ पर भी निर्देश हो चुका है (वहां देखें) । अतः ब्रह्म साम-विषयक कल्पों के भिन्न भिन्न होने से विरोध के कारण राजन्यों और वैश्यों का सत्र में अधिकार नहीं है ।

व्याख्या—जो कहा है—लिङ्ग के दर्शन से [ब्राह्मण राजन्य वैश्य सबका सत्र में अधिकार है] । उसका परिहार करो । इसमें कहते हैं—

स्वामित्वादितरेषामहीने लिङ्गदर्शनम् ॥२३॥

सूत्रार्थः—(स्वामित्वात्) सत्र में ऋत्विजों के स्वामित्व का विधान होने से (इतरे-षाम्) ब्रह्मसाम में श्रुत राजन्यों और वैश्यों का (अहीने) अहीन संज्ञक द्वादशाह में (लिङ्ग-दर्शनम्) लिङ्ग का दर्शन उपपन्न हो जायगा ।

व्याख्या—अहीन को ही सत्र शब्द से आगे कहेंगे । यतः [सत्र में] ऋत्विजों के स्वामित्व का विधान किया जाता है । अतः ऋत्विजों के स्वामी होने से राजन्य और वैश्यों का सत्र उपपन्न नहीं होता है । इससे अहीन में लिङ्गदर्शन उपपन्न हो जायेगा ॥२३॥

व्याख्या—यह जाना गया—ब्राह्मणों का ही सत्र है राजन्यों और वैश्यों का नहीं । अब यह सन्दिग्ध है—क्या सब ब्राह्मणों का अथवा वासिष्ठों का वह, अथवा भृगु शुनक वसिष्ठों को छोड़कर अन्यों का ? क्या प्राप्त होता है ? सबका विशेष [का श्रवण] न होने से । किसी विशेष का आश्रय नहीं किया है, इन ब्राह्मणों का सत्र है और इनका नहीं । इससे सबका है । ऐसा प्राप्त होने पर कहते हैं—

वासिष्ठानां वा ब्रह्मत्वनियमात् ॥२४॥ (पू०)

वासिष्ठानां ब्रह्मत्वस्य नियमात्, वासिष्ठानां सत्रं स्यान्नान्येषाम्। कुतः ? ब्रह्मत्वस्य नियमो भवति—**वासिष्ठो ब्रह्मा भवति**[1] इति। अतो वासिष्ठानां तत्समानकल्पानां च सत्रं स्यादिति ॥२४॥

सर्वेषां वा प्रतिप्रसवात् ॥२५॥ (पू०)

सर्वेषां वा सत्रं स्यात्। अविशेषात्। ननु **वासिष्ठो ब्रह्मेत्युच्यते**। नेत्याह। पुनः प्रतिप्रसूयते—**य एव कश्चन स्तोमभागमधीयीत स एव ब्रह्मा भवेद्**[2] इति। वासिष्ठोपदेश इदानीं किमर्थं इति चेत् ? स्तोमभागप्रशंसार्थः। स्तोमभागानधीयानोऽवासिष्ठोऽपि वासिष्ठकार्यं समर्थः कर्तुमिति ॥२५॥

वासिष्ठानां वा ब्रह्मत्वनियमात् ॥२४॥

सूत्रार्थः—(वा) 'वा' शब्द अवधारण अर्थ में है। (वासिष्ठानाम्) वासिष्ठ गोत्रवालों का (वा) ही सत्र है, (ब्रह्मत्वनियमात्) सत्र में वासिष्ठ ब्रह्मा के नियम होने से।

व्याख्या—वासिष्ठों के ब्रह्मत्व का नियम होने से वासिष्ठों का सत्र होवे, अन्य का नहीं। किस हेतु से ? ब्रह्मत्व का नियम होता है—वासिष्ठो ब्रह्मा भवति (=वासिष्ठ ब्रह्मा होता है)। इससे वासिष्ठों का और उसके समान कल्प वालों का सत्र होवे।

सर्वेषां वा प्रतिप्रसवात् ॥२५॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त पक्ष की निवृत्ति के लिये है। (सर्वेषाम्) सब का सत्र होवे (प्रतिप्रसवात्) प्रतिप्रसव होने से।

व्याख्या—अथवा सबका सत्र होवे, विशेष कथन न करने से। (आक्षेप) वासिष्ठो ब्रह्मा ऐसा [विशेष] कहा जाता है। (समाधान) नहीं, पुनः प्राप्ति कराई जाती है। जो कोई भी स्तोम भागों को पढ़ता है वह ब्रह्मा होवे। वासिष्ठ का उपदेश किस लिये है ऐसा कहो तो, स्तोम भाग की प्रशंसा के लिये है। स्तोम भागों को पढ़ता हुआ अवासिष्ठ भी वासिष्ठ कार्य को करने में समर्थ होता है।

विशेष—कुतूहलवृत्ति में व्याख्या की है—वासिष्ठो ब्रह्मा वैश्वामित्रो होता इनके प्रतिप्रसव=विरोध से दोनों ही सत्र में प्रवृत्त नहीं होते हैं [अतः सब ब्राह्मणों का अधिकार है] ॥२५॥

---

१. अनुपलब्धमूलम्। २. अनुपलब्धमूलम्।

वैश्वामित्रस्य[1] हौत्रनियमाद् भृगुशुनकवसिष्ठानामनधिकारः ॥२६॥ (उ०)

भृग्वादीनामनधिकारः स्यात् । कुतः ? वैश्वामित्रस्य हौत्रं नियम्यते—**विश्वामित्रो होता भवति[2]** इति । तस्माद् वैश्वामित्राणां, तैश्च समानकल्पानामधिकार इति ॥२६॥ **सत्रे वैश्वामित्रतत्समानकल्पानामेवाधिकाराधिकरणम् ॥४॥**

[सारस्वतभिन्नसत्रेष्वाहिताग्नीनामेवाधिकाराधिकरणम् ॥५॥]

सत्राण्येवोदाहरणम्—**य एवं विद्वांसः सत्रमासते[3], य एवं विद्वांसः सत्रमुपयन्ति[3]** इति । तेषु संदेहः—किं साग्नीनामनग्नीनां च तानि भवन्ति, उत साग्नीनामेवेति ? किं प्राप्तम् ?

विहारस्य प्रभुत्वादनग्नीनामपि स्यात् ॥२७॥ (पू०)

वैश्वामित्रस्य हौत्रनियमाद् भृगुशुनकवसिष्ठानामनधिकारः ॥२६॥

सूत्रार्थः—(वैश्वामित्रस्य) वैश्वामित्र के (हौत्रनियमात्) हौत्र के नियम से (भृगुशुनकवसिष्ठानाम्) भृगु शुनक और वसिष्ठों का (अनधिकारः) सत्र में अधिकार नहीं है ।

व्याख्या—भृगु आदि का अनधिकार होवे । किस हेतु से ? वैश्वामित्र का हौत्र कर्म नियमित है—विश्वामित्रो होता भवति (=विश्वामित्र 'होता' होता है) । इससे वैश्वामित्रों का तथा उनके साथ समान कल्पवालों का [सत्र में] अधिकार है ।

विवरण—**विश्वामित्रो होता भवति**—सूत्र में **वैश्वामित्रस्य हौत्रनियमात्** पाठ होने से तथा पूर्वसूत्रभाष्य में उद्धृत वासिष्ठो ब्रह्मा भवति वचन की साम्यता से तथा कुतूहलवृत्ति ६।६।२५ में **वैश्वामित्रो होता** पाठ होने से यहां **वैश्वामित्रो होता भवति** पाठ होना चाहिये ॥२६॥

व्याख्या—सत्र ही उदाहरण हैं—य एवं विद्वांसः सत्रमासते, य एवं विद्वांसः सत्रमुपयन्ति (बहुत्र व्याख्यात) । इनमें सन्देह होता है—क्या साग्नियों (=जिनने अग्न्याधान किया है) के और निरग्नियों (=जिन्होंने अग्न्याधान नहीं किया है) के वे (=सत्र) होते हैं अथवा साग्नियों के ही ? क्या प्राप्त होता है ?

विहारस्य प्रभुत्वाद् अनग्नीनामपि स्यात् ॥२७॥

---

१. 'विश्वामित्रस्य' इति मुद्रितेषु भाष्यपुस्तकेषु पाठः । सुबोधिनीकुतूहलवृत्त्योः 'वैश्वामित्रस्य' इत्येव पाठः । भाष्येऽपि 'वैश्वामित्रस्य' इत्येवोच्यते ।

२. अनुपलब्धमूलम् । कुतूहलवृत्तौ 'वैश्वामित्रो होता' इत्येवोद्ध्रियते ।

३. अनुपलब्धमूलम् ।

साग्नीनामनग्नीनां च । कुतः ? विहारस्य प्रभुत्वात् । प्रभवति हि परकीयोऽपि विहारः सर्वेषामुपकर्तुम् । [1]क्रत्वर्थो हि तेन सिध्यति । स यदीयेन तदीयेन वा सिद्धिमुपैति । तस्मादनग्नीनामपि भवितुमर्हतीति ॥२७॥

सारस्वते च दर्शनात् ॥२८॥ (पू०)

सारस्वते च सत्रे भवति दर्शनम् - **परस्थैर्वा एते स्वर्गं लोकं यन्ति, येऽनाहिताग्नयः सत्रमासते**[2] इति । अनाहिताग्नीनां सत्रं दर्शयति । तस्मादपि सर्वेषाम् ॥२८॥

सूत्रार्थः—(विहारस्य) परकीय विहार=यज्ञीय स्थान के (प्रभुत्वात्) क्रतु के लिये समर्थ होने से (अनग्नीनाम्) जिन्होंने अग्न्याधान नहीं किया है, उनका (अपि) भी सत्र (स्यात्) होवे ।

व्याख्या—**साग्नियों और अनग्नियों के [सत्र होवें] । किस हेतु से ? विहार के समर्थ होने से । परकीय (=दूसरे का) विहार भी सबका उपकार करने में समर्थ होता है । उस (=परकीय विहार) से क्रतु का प्रयोजन सिद्ध हो जाता है । वह (क्रतु) जिस किसी के विहार से सिद्धि को प्राप्त होता है । इससे अग्निरहितों का भी [सत्र में अधिकार] होना योग्य है ॥२७॥**

सारस्वते च दर्शनात् ॥२८॥

सूत्रार्थः—(च) और (सारस्वते) सारस्वत सत्र में (दर्शनात्) अनग्नियों के सत्र का दर्शन होने से ।

व्याख्या—**सारस्वत सत्र में देखा जाता है**-परस्थैर्वा एते स्वर्गं लोकं यन्ति येऽनाहिताग्नयः सत्रमासते (=**दूसरों के रथों से ये स्वर्ग लोक को जाते हैं जो अनाहिताग्नि सत्र करते हैं) । इससे अनाहिताग्नियों का सत्र दर्शाया है । इससे भी सबका सत्र होवे ।**

विवरण—परस्थैर्वा—यह वचन तो हमें उपलब्ध नहीं हुआ परन्तु निदानसूत्र(५।१३) **में कथमनाहिताग्नेः सत्रासनम्** (=अनाहिताग्नि का सत्र कैसे होगा) इस प्रकरण में लिखा है—**तदपि शश्वद् ब्राह्मणम् भवति—यथा परस्थेनाध्वानमियादेवमेष स्वर्गं लोकमप्येति यः पराग्निषु दीक्षित इति** (=यह भी निश्चय ही ब्राह्मण होता है—जैसे दूसरे के रथ से मार्ग को जाता है, इसी प्रकार यह स्वर्गलोक को भी प्राप्त होता है जो दूसरे की अग्नियों में दीक्षा ग्रहण करता है) ॥२८॥

---

१. 'कर्तव्यो हि' इति काशीमुद्रिते पाठः ।

२. अनुपलब्धमूलम् । द्र०—**यथा परस्थेनाध्वानमियादेवमेष स्वर्गं लोकमप्येति यः पराग्निषु दीक्षित इति ।** निदानसूत्र ५।१३॥

प्रायश्चित्तविधानाच्च ॥२९॥ (पू०)

प्रायश्चित्तं विधीयते—**अग्नये विविचयेऽष्टाकपालं पुरोडाशं निर्वपेद् यस्याऽऽहिताग्नेरन्यैरग्निभिरग्नयः संसृज्येरन्**[1] इति। संसर्गेऽग्नीनां प्रायश्चित्तं दर्शयति। स एवं स्यादनाहितैः, नान्यथा। तस्मादप्यनग्नीनां सत्राणीति ॥२९॥

साग्नीनां वेष्टिपूर्वत्वात् ॥३०॥ (उ०)

साग्नीनां वा सत्राणि, नानग्नीनाम्। कस्मात्? इष्टिपूर्वत्वात्। इष्टिपूर्वत्वं सोमानामाम्नातम्—**दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत**[2] इति ज्योतिष्टोमस्येष्टि-

---

प्रायश्चित्तविधानाच्च ॥२९॥

सूत्रार्थः—(प्रायश्चित्तविधानात्) प्रायश्चित्त के विधान से (च) भी अग्निरहितों के सत्र होते हैं।

व्याख्या—प्रायश्चित्त का विधान किया जाता है—अग्नये विविचयेऽष्टाकपालं पुरोडाशं निर्वपेत्, यस्याहिताग्नेरन्यैरग्निभिरग्नयः संसृज्येरन् (=विविचि अग्नि के लिये अष्टाकपाल पुरोडाश का निर्वाप करे, जिस आहिताग्नि की अग्नियां अन्य अग्नियों के साथ संपृक्त हो जायें=मिल जायें)। यह अग्नियों के संसर्ग में प्रायश्चित्त दर्शाता है। वह (=संसर्ग) इसी प्रकार अनाहित अग्नियों के साथ हो सकता है, अन्यथा नहीं हो सकता। इससे भी अग्निरहितों का सत्र होता है।

विवरण—अग्नये विविचये—विपूर्वक 'विचिर् पृथग्भावे' (द्र० क्षीरतरङ्गिणी ३।१३, पाठान्तर) धातु से कर्ता में औणादिक इक् प्रत्यय। विविचि=विवेक्ता=पृथक्कर्ता गुण-विशिष्ट अग्नि के लिये ॥२९॥

साग्नीनां वेष्टिपूर्वत्वात् ॥३०॥

सूत्रार्थः—(साग्नीनाम्) अग्निसहितों के (वा) ही सत्र होवें, सोमयाग के (इष्टि-पूर्वत्वात्) इष्टिपूर्वक होने से। अर्थात् सोमयाग दर्शपूर्णमास से यजन करने के पश्चात् विहित है। यही धर्म अतिदेश से सत्रों में भी प्राप्त होगा।

व्याख्या—साग्नियों के ही सत्र होवें अग्निरहितों के नहीं होवें। किस हेतु से? इष्टि-पूर्वत्व के विधान से। सोमयागों का इष्टि पूर्वत्व कहा गया है—दर्शपूर्णमासाभ्यामिष्ट्वा

---

१. अनुपलब्धमूलम्। द्र०—'अग्नये विविचये पुरोडाशमष्टाकपालं निर्वपेत्। तै० ब्रा० ३।७।३।५॥ अग्नये विविचयेऽष्टाकपालं यस्याहिताग्नेरन्यैरग्निभिरग्नयः संसृज्येरन्॥ आप० श्रौत ९।३।१८॥

२. अनुपलब्धमूलम्। द्र०—दर्शपूर्णमासाविष्ट्वा सोमेन यजते। तै० सं० २।५।६।१॥

पूर्वत्वम् । तच्चोदकपरम्परया सत्राणि प्रति प्राप्तम् । तस्मान्नानग्नीनां तानि भवेयु-रिति ॥३०॥

स्वार्थेन च प्रयुक्तत्वात् ॥३१॥ (उ०)

स्वार्थेन चाग्नयः प्रयुक्ताः । कथम् ? उपग्रहविशेषात्[1] । उपग्रहविशेषो हि भवति—अग्नीनादधीत[2] इति । तस्मादन्यस्याग्निभिरन्यस्य न सिद्धिः, यद्यपि क्रत्वर्था अग्नय इति ॥३१॥

संनिवापं च दर्शयति ॥३२॥ (उ०)

सावित्राणि होष्यन्तः संनिवपेरन्[3] इति । तेनापि साग्नयः सत्राण्युपासत इति

सोमेन यजेत (=दर्शपूर्णमास से यजन करके सोम से याग करे) इससे ज्योतिष्टोम का इष्टि-पूर्वत्व कहा है । वह [धर्म] चोदक=अतिदेश की परम्परा से सत्रों के प्रति प्राप्त है । इससे अग्निरहितों के वे (सत्र) न होवें ॥३०॥

स्वार्थेन च प्रयुक्तत्वात् ॥३१॥

सूत्रार्थः—अग्नियों के (स्वार्थेन) अपने लिये (प्रयुक्तत्वात्) प्रयुक्त होने से (च) भी अग्निरहितों के सत्र न होवें ।

व्याख्या—अग्नियां स्वप्रयोजन से प्रयुक्त हैं । कैसे ? उपग्रहविशेष से । उपग्रह विशेष ही होता है—अग्नीन् आदधीत (=अग्नियों का अपने लिये आधान करे) । इससे अन्य की अग्नियों से अन्य [के कर्म] की सिद्धि नहीं होगी, यद्यपि अग्नियां क्रतु के लिये हैं ।

विवरण—उपग्रहविशेषात्—उपग्रह शब्द से आत्मनेपद और परस्मैपद कहे जाते हैं । अग्नीनादधीत में आत्मनेपद के प्रयोग से अपने लिये ही अग्नियों का आधान होता है ॥३१॥

संनिवापं च दर्शयति ॥३२॥

सूत्रार्थः—सत्रियों की स्व-स्व अग्नियों का (संनिवापम्) मिलाना (च) भी (दर्शयति) दिखाता है=जनाता है कि साग्नियों का ही सत्र होवे ।

व्याख्या—सावित्राणि होष्यन्तः सन्निवपेरन् (=सवितृदेवताक हवियों का होम

---

१. उपग्रहः—परस्मैपदमात्मनेपदं च । इहोपग्रहविशेष आत्मनेपदम्—अग्नीनादधीत इति । २. अनुपलब्धमूलम् । 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति मी०२।३।४ भाष्य उद्धृतः ।

३. अनुपलब्धमूलम् । द्र०—सावित्राणि होष्यमाणा निर्मथ्य सन्निवपेरन् । आप० श्रौत २१।३।१२॥

गम्यते ॥३२॥ सारस्वतभिन्नसत्रेष्वाहिताग्नीनामेवाधिकाराधिकरणम् ॥५॥

एवं लिङ्गपरिहारावशिष्टे[1]ऽधिकरणेऽन्यच्चिन्त्यते—

[सत्रे साधारणपात्राणामधिकाराधिकरणम् ॥६॥]

किं जुह्वादीनि पात्राणि कस्यचिदेव यजमानस्योपादाय[2] प्रयोगः कर्तव्य उतान्यानि साधारणानि कर्तव्यानीति[3] किं प्राप्तम् ?

जुह्वादीनामप्रयुक्तत्वात् संदेहे यथाकामी प्रतीयेत ॥३३॥ (पू०)

करते हुए [सत्र करने वाले स्व-स्व अग्नियों को मिलावें] । इस से भी साग्नि ही सत्र करते हैं ऐसा जाना जाता है ।

विवरण—सावित्राणि होष्यन्तः—यह वचन सत्र के आरम्भ में पठित है । इससे सत्र करने वालों की अपनी अपनी अग्नियों को इकट्ठा करने (=मिलाने) का विधान किया है ॥३२॥

व्याख्या—इस प्रकार लिङ्ग के परिहार नहीं कहे गये हैं जिस अधिकरण में, उसमें अन्य विचार करते हैं—

विवरण—लिङ्गपरिहारौ—सूत्र २८, २९ से अग्निरहितों के भी सत्र में अधिकार दर्शानेवाले दो वचन दर्शाये थे, उनका परिहार विना किये ही अर्थात् अधिकरण विना समाप्त हुए ही नया विचार आरम्भ करते हैं। सूत्र २८, २९ में कहे गये लिङ्गों में से प्रायश्चित्त-विधानरूप लिङ्ग का परिहार आगे ३५ वें सूत्र में कहेंगे । सूत्र २८ के लिङ्ग का परिहार हम वहीं लिखेंगे ।

व्याख्या—[सत्र में] क्या जुहू आदि पात्र किसी भी यजमान के लेकर प्रयोग (=कर्म) करना चाहिये अथवा अन्य साधारण (=सब सत्रियों के सम्मिलित नये) [जुहू आदि पात्र] बनाने चाहियें । क्या प्राप्त होता है—

जुह्वादीनामप्रयुक्तत्वात् सन्देहे यथाकामी प्रतीयेत ॥३३॥

सूत्रार्थः—(जुह्वादीनाम्) जुहू आदि के विषय में पात्रग्रहण के समय स्वपात्र के

---

१. न शिष्टं लिङ्गपरिहारौ यस्मिन्नधिकरणे, अर्थात् असमाप्तेऽधिकरणे ।

२. 'उपात्तानि भवेयुरुत' इति पाठान्तरम् ।

३. इतोऽग्रे पूनासंस्करणे 'अस्मिन् संशये उच्यते' इत्यधिकः पाठः, स चासंबद्धः ।

जुह्वादिषु यथाकामी भवेत्। यस्य कस्यचिदेव यजमानस्योपादाय प्रयोगः कर्तव्यः। कुतः? न हि स्वं पात्रं यजमानः प्रयुङ्क्ते। स्वेन पात्रेण प्रयोगः कर्तव्य इति। तस्मात् परकीयपात्रैरन्ये यजेरन्निति ॥३३॥

अपि वाऽन्यानि पात्राणि साधारणानि कुर्वीरन्
विप्रतिषेधाच्छास्त्रकृतत्वात् ॥३४॥ (उ०)

(अप्रयुक्तत्वात्) प्रयुक्त न होने से अर्थात् न कहने से (सन्देहे) सन्देह होने पर (यथाकामी) यथेच्छाचारी (प्रतीयेत) जाना जाये।

विशेष—इस सूत्र का अभिप्राय यह है कि—**अग्नीन् आदधीत** में आत्मनेपद के प्रयोग से जैसे स्वीय अग्नि में ही कर्म प्राप्त होता है, उस प्रकार पात्रग्रहण काल में 'स्व पात्रों से ही प्रयोग (=कर्म) करे' ऐसा उल्लेख न होने से किसी के भी पात्र से प्रयोग हो सकता है।

व्याख्या—जुह्वा आदि में यथाकामी (=यछेच्छ व्यवहार करनेवाला) होवे। जिस किसी यजमान के [पात्रों को] ग्रहण करके प्रयोग करना चाहिये। किस हेतु से? यजमान स्व-पात्र को प्रयोजित नहीं करता—स्व-पात्र से प्रयोग करना चाहिये [ऐसा नहीं कहा जाता है]। इससे परकीय पात्रों से अन्य यजन करें ॥३३॥

अपि वाऽन्यानि पात्राणि······शास्त्रकृतत्वात् ॥३४॥

सूत्रार्थः—(अपि वा) 'अपि वा' से पूर्व उक्त पक्ष निवृत्त होता है—ऐसा नहीं है। (अन्यानि) अन्य नवीन (पात्राणि) पात्र (साधारणानि) साधारण=सब सत्रियों के साझे (कुर्वीरन्) प्रयुक्त करें। (विप्रतिषेधात्) विप्रतिषेध=विरोध होने से (शास्त्रकृतत्वात्) मृत यजमान के शरीर के साथ उसके पात्रों का दहन शास्त्रकृत होने से।

विशेष—सत्र में बैठे हुए यजमानों में से किसी के जुहू आदि पात्रों का यदि प्रयोग किया जाये और दैववश उसकी मृत्यु हो जाये तो 'यजमान के शरीर का पात्रों के साथ दहन करना चाहिये' इसका विरोध होगा, क्योंकि सत्र में प्रयुक्त पत्रों का शव के साथ दहन सम्भव होगा नहीं।

कुतूहलवृत्ति में **'शास्त्रकृतत्वाच्च'** पाठ है। इसका तात्पर्य इस प्रकार प्रकट किया है—जिस यजमान के जुहू आदि पात्रों का सत्र में प्रयोग हो रहा है उसकी मृत्यु हो जाने पर **दक्षिणे हस्ते जुहूं सादयति** (=दाहिने हाथ में जुहू को रखता है) आदि विहित प्रतिपत्तिकर्म के लुप्त होने से विरोध होगा। और यदि मृत यजमान के पात्रों को मृत शरीर के साथ दहन करें तो आरम्भ किया गया सत्र विगुण (=गुणरहित) होगा। यह भी नहीं कह सकते कि अन्य जीवित यजमान के पात्रों से कर्म समाप्त कर लिया जायेगा, वैसा होने पर शास्त्र

अपि वेति पक्षव्यावृत्तिः—नैतदेवम् । अन्यानि हि पात्राणि साधारणानि कर्तव्यानि । कस्मात् ? विप्रतिषेधात् । विप्रतिषेधो हि भवति । कदाचित् तानि पात्राण्युपात्तानि भवेयुः, अथ मरणं कस्यचिद् यजमानस्याऽऽपद्येत, तत्र विप्रतिषेधः स्यात्—**आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च**' इति । यदि तं तैर्दहेयुरितरेषां यज्ञो विरुध्येत । अथ तैर्यज्ञं समापयेयुरितरस्य 'शरीरसंस्कारः परिलुप्येत । अन्येषु पुनः साधारणेषूपादीयमानेषु न किंचिदपि विरुध्येत । तस्मात् तथा कार्यमिति ॥३४॥

अथेदानीं पूर्वोक्तस्य लिङ्गस्य परिहार उच्यते—

प्रायश्चित्तमापदि स्यात् ॥३५॥ (उ०)

प्रायश्चित्तमस्मत्पक्षेऽप्यवकल्पिष्यते । कथम् ? अरण्ये कान्तारे गच्छतां

द्वारा कर्म के शीघ्रभाव का विधान होने से क्रतु की गुणरहितता अवर्जनीय ही रहेगी अर्थात् क्रतु में विलम्ब होने से वह विगुण होगा ही ।

व्याख्या—'अपि वा' से पक्ष की निवृत्ति होती है—ऐसा नहीं है । अन्य पात्र साधारण (=सब सत्रियों के सम्मिलित) ही करने चाहिये । किस हेतु से ? विप्रतिषेध (=विरोध) होने से । विप्रतिषेध होता है—कदाचित् [किसी के] वे पात्र [सत्र में] ग्रहण किये हुए होवें, और किसी यजमान का मरण हो जावे, उस अवस्था में विरोध होगा । आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च (=आहिताग्नि को अग्नियों से जलाते हैं और यज्ञपात्रों से) । यदि उस [मृत यजमान] को उन [सत्र में प्रयुक्त पात्रों] से जलावें तो अन्यों का यज्ञ विरुद्ध होवे अर्थात् रुक जाये और यदि उन [पात्रों] से यज्ञ को समाप्त करें तो इतर [मृत यजमान] का शरीरसंस्कार लुप्त होवे । अन्य नये साधारण पात्रों के उपादान करने पर कुछ भी विरुद्ध नहीं होता है । इससे उस प्रकार करना चाहिये अर्थात् नवीन साधारण पात्रों का सत्र में उपादान करना चाहिये ॥३४॥

व्याख्या—अब पूर्व उक्त लिङ्ग का परिहार कहते हैं—

विवरण—पूर्व अधिकरण लिङ्ग का परिहार किये विना ही मध्य में छोड़ दिया था, उसी की पूर्ति के लिये लिङ्ग का परिहार करते हैं ।

प्रायश्चित्तमापदि स्यात् ॥३५॥

सूत्रार्थः—(प्रायश्चित्तम्) अग्नियों के संसर्ग में जो प्रायश्चित्त कहा है वह (आपदि) आपत्काल में (स्यात्) होवे । अर्थात् प्रायश्चित्तविधान किसी आपत्काल में अग्नियों का संसर्ग हो जाये तो उसके लिये विहित है, अनग्नियों के सत्र में अधिकार का द्योतक नहीं है ।

व्याख्या—प्रायश्चित्त हमारे पक्ष में भी उपपन्न हो जायेगा । कैसे ? अरण्य वा कान्तार में जाते हुओं अथवा ठहरे हुओं का दस्यु के भय से अथवा हिंस्र पशु के भय से त्रास (=उद्वेग=

---

१. अनुपलब्धमूलम् । २. 'शरीरसंस्काराः परिलुप्येरन्' इति काशीमुद्रिते पाठः ।

स्थितानां वा दस्युभयात्, श्वापदभयाद्वा त्रासे जाते दावाग्निना वा संसृज्येरन्, मिथो वा स विषयः प्रायश्चित्तस्य भविष्यतीति ॥३५॥ सत्रे साधारणयात्राणामधिकाराधिकरणम् ॥६॥

[श्रुतसाप्तदश्यासु विकृतिषु वर्णत्रयाधिकाराधिकरणम् ॥७॥]

अध्वरकल्पा उदाहरणम्, आग्रयणेष्टिः पशुरित्येवंलक्षणकानि कर्माणि, येषु सप्तदश सामिधेन्यः। तेषु संदेह—किं त्रयाणामपि वर्णानामेभिः कर्मभिरधिकार उत वैश्यस्यैवेति ? किं प्राप्तम् ?

भगदड़) उत्पन्न होने पर अथवा दावाग्नि (=जंगल की अग्नि) से [यजमान की अग्नियां] संस्पृष्ट (मिल) हो जाये अथवा आपस में मिल जायें, तो वह प्रायश्चित्त का विषय होगा।

विवरण—अरण्ये कान्तारे—अरण्ये=साधारण वन, कान्तार=दुर्गम वन।

विशेष—पूर्व अधिकरण में दो लिङ्ग दर्शाये थे—सारस्वत में दर्शन और प्रायश्चित्त-विधान। इनमें से यहां केवल प्रायश्चित्तविधानरूप लिङ्ग का समाधान कहा है। 'सारस्वत में दर्शन' का समाधान नहीं किया है। इसके विषय में कुतूहलवृत्तिकार ने कहा है—सारस्वत-सत्र में और कोई गति वा समाधान न होने से वचनसामर्थ्य से अनग्नियों का भी अधिकार स्वीकृत होने पर भी सर्वत्र ऐसी कल्पना युक्त नहीं है। यह समाधान स्पष्ट है। अतः सूत्रकार ने इसके समाधान की उपेक्षा की है ॥३५॥

व्याख्या—यहां अध्वरकल्पा नाम्नी इष्टि उदाहरण है। [तथा] आग्रयणेष्टि और पशु आदि इस प्रकार के कर्म जिनमें सप्तदश सामिधेनियां हैं। उसमें सन्देह होता है—क्या तीनों ही वर्णों का इन कर्मों में अधिकार है अथवा वैश्य का ही ? क्या प्राप्त होता है ?

विवरण—अध्वरकल्पा उदाहरणम्—अध्वरकल्पा नाम की एक इष्टि है। यहां अध्वर शब्द से सोमयाग अभिप्रेत है। अध्वर शब्द से ईषदसमाप्तौ कल्पब्देश्यदेशीयरः (अष्टा० ५।३।६७) से ईषद् असमाप्ति='थोड़ी न्यूनता से सम्पूर्णता' अर्थ में कल्पप् प्रत्यय होता है। अध्वरकल्पा=अध्वरता में थोड़ी न्यून। अध्वरकल्पा इष्टि का उल्लेख आगे मी० ११।२।१९ में भी आयेगा। वहां भाष्यकार ने लिखा है—आग्नावैष्णवं प्रातरष्टाकपालं निर्वपेत् सारस्वतं चरुं बार्हस्पत्यं चरुम्, आग्नावैष्णवमेकादशकपालमाध्यन्दिने सारस्वतं चरुं बार्हस्पत्यं चरुम्, आग्नावैष्णवं द्वादशकपालमपराह्णे सारस्वतं चरुं बार्हस्पत्यं चरुं, यस्य भ्रातृव्यः सोमेन यजेत।

अध्वर=सोमयाग में प्रातः सवन, माध्यन्दिन सवन, तृतीय सवन होते हैं तद्वत् ही इस

पुरुषकल्पेन वा विकृतौ कर्तृनियमः स्याद् यज्ञस्य तद्गुणत्वाद् अभावादितरान् प्रत्येकस्मिन्नधिकारः स्यात् ॥३६॥ (पू०)

एतस्यां विकृतौ पुरुषकल्पेन कर्ता नियम्येत। कुतः? यज्ञस्य तद्गुणत्वात्। यज्ञोऽयमध्वरकल्पादिरेतत्संख्यागुणकः। इयं च संख्या वैश्यस्योक्ता—**सप्तदशानुब्रूयाद् वैश्यस्य**[1] इति। तेन वैश्य एवैतत् कर्म कृत्स्नं कर्तुं समर्थः। सप्तदशगुणकमेतत् कर्म। तच्च साप्तदश्यमवैश्येन क्रियमाणमसाधु। इतरान् प्रति हि तन्न चोद्यते तेन यजेतेति। असामर्थ्याद् ब्राह्मणक्षत्रियान् नाधिकरिष्यतीति ॥३६॥

में भी प्रातः माध्यन्दिन और अपराह्ण तीनकाल में विभिन्न हविष्क याग कहे हैं यही इस इष्टि की अध्वर के साथ साम्यता है। तै० सं० २।२।६।४-७ तथा बौधा० श्रौत १३।१६ में अध्वरकल्पा वर्णित है। उसमें कुछ भेद है। दोनों स्थानों में **प्रातःसवनस्य काले, माध्यन्दिनस्य सवनस्य काले, तृतीयसवनस्य काले, वशायै काले** इत्यादि स्पष्ट उल्लेख मिलता है।

पुरुषकल्पेन वा विकृतौ कर्तृनियमः…… प्रत्येकस्मिन्नधिकारः स्यात् ॥३६॥

सूत्रार्थः—(विकृतौ) विकृति में (पुरुषकल्पेन) पुरुषकल्प से (वा) ही (नियमः) नियम (स्यात्) होवे, (यज्ञस्य) यज्ञ के सप्तदश संख्या के प्रति (गुणभूतत्वात्) गुणभूत होने से (इतरान्) [वैश्य से] भिन्नों के (प्रति) प्रति (अभावात्) सप्तदश सामिधेनियों के विधान का अभाव होने से (एकस्मिन्) एक वैश्य में (अधिकारः) अधिकार (स्यात्) होवे।

विशेष—**पुरुषकल्पेन**—जैसे पूर्व अधिकरण (पृष्ठ १६०४-१६१७) में वसिष्ठादि के भेद से नाराशंस और तनूनपात् का नियम होता है। तद्वत् यहां भी **सप्तदशानुब्रूयाद् वैश्यस्य** वचन से सप्तदश सामिधेनियों का भी वैश्य से नियम होवे।

व्याख्या—विकृति यागों में पुरुष के कल्प से कर्ता नियमित होवे। किस हेतु से? यज्ञ के गुणभूत होने से। यह अध्वरकल्पादि यज्ञ इस संख्या युक्त गुण वाला है [अर्थात् सप्तदश संख्या वाला है] और यह (=सप्तदश) संख्या वैश्य की कही है—सप्तदशानुब्रूयाद् वैश्यस्य (=वैश्य की सप्तदश सामिधेनियां बोले)। इससे वैश्य ही इस (सप्तदश संख्यावाले अध्वरकल्पादि) कर्म को पूर्णता से करने में समर्थ है। यह (=अध्वरकल्पादि) कर्म सप्तदश संख्या वाला है। वह साप्तदश्य (=सप्तदश सम्बन्धी कर्म) वैश्य से किया हुआ साधु होता है। अन्यों (ब्राह्मण-राजन्यों) के प्रति (वह) (=साप्तदश्य) नहीं कहा जाता है—उससे यजन करे। इस सामर्थ्य से ब्राह्मण और क्षत्रियों को [अध्वरकल्पादि कर्म में] अधिकृत नहीं करेगा ॥३७॥

---

१. तै० सं० २।५।१०।२॥

लिङ्गाच्चेज्याविशेषवत् ॥३७॥ (पू०)

लिङ्गं च भवति यथा वैश्यस्य साप्तदश्यमिति—**सप्तदशो वै वैश्यः**[1] इति। तेन[2] नावैश्यस्य साप्तदश्यम्। अतो वैश्यस्यैवंजातीयकानि कर्माणि। यथा इज्याविशेषो वैश्यस्य भवति—**वैश्यो वैश्यस्तोमेन यजेत**[3] इति वैश्यसंबन्धात्। एवं साप्तदश्यं तस्यैवेति ॥३७॥

न वा संयोगपृथक्त्वाद् गुणस्येज्याप्रधानत्वादसंयुक्ता हि चोदना ॥३८॥ (उ०)

लिङ्गाच्चेज्याविशेषवत् ॥३७॥

सूत्रार्थः—(लिङ्गात्) लिङ्ग से (च) भी (इज्याविशेषवत्) विशेष इज्या के समान। [सूत्रार्थ की स्पष्टता के लिये भाष्य व्याख्या देखें।]

व्याख्या—लिङ्ग भी होता है जैसा कि साप्तदश्य (=सप्तदश संबन्धी कर्म) वैश्य का होता है—सप्तदशो वै वैश्य इति (=वैश्य सत्रहवां है)। इससे साप्तदश्य वैश्य से भिन्न का नहीं है। इससे इस प्रकार (सप्तदशसामिधेनी वाले) कर्म वैश्य के हैं। जैसे वैश्य की इज्या (=इष्टि=याग) विशेष होता है—वैश्यो वैश्यस्तोमेन यजेत (=वैश्य वैश्यस्तोम नामक याग से यजन करे) वैश्य के सम्बन्ध से। इसी प्रकार साप्तदश्य भी उसी का है।

न वा संयोगपृथक्त्वाद्..... असंयुक्ता हि चोदना ॥३८॥

सूत्रार्थः—(न वा) 'न वा' पद पूर्व उक्त पक्ष की निवृत्ति के लिये हैं। (संयोगपृथक्त्वात्) वाक्यरूप दोनों साप्तदश्य सम्बन्धी संयोगों के पृथक् होने से (गुणस्य) साप्तदश्य गुण के (इज्याप्रधानत्वात्) यागप्रधान होने से। (चोदना) साप्तदश्य विधायक वचन (असंयुक्ता) वैश्य से संयुक्त नहीं है।

विशेष—सूत्र का भाव यह है कि दर्शपूर्णमासगत **सप्तदशानुब्रूयाद् वैश्यस्य** वचन और अध्वरकल्पादि में पठित साप्तदश्यविधायक वचन परस्पर असंबद्ध हैं। दर्शपूर्णमासगत **सप्तदशानुब्रूयाद् वैश्यस्य** वचन गुणप्रधान है, और विकृतिरूप अध्वरकल्पादि में पठित **सप्तदशानुब्रूयात्** वचन इज्याप्रधान है। अतः दोनों के चोदना वचनों के असंयुक्त होने से अध्वरकल्पादि में सप्तदश सामिधेनियों के होने पर भी उनमें त्रैवर्णिकों का अधिकार है।

---

१. तै० सं० २।५।१०।२॥

२. 'तेन वैश्यस्य साप्तदश्यम्' इति काशीमुद्रिते पाठान्तरम्।

३. अनुपलब्धमूलम्। द्र०—वैश्यपशुकामयोर्वैश्यस्तोमः। कात्या० श्रौत २२।९।६॥ वैश्यस्तोमसंज्ञक एकाहो वैश्यस्य, पशुकामस्य च त्रैवर्णिकस्य इत्यर्थः॥

न चैतदस्ति। पृथगेतौ संयोगौ। एक वाक्यं—**सप्तदश वैश्यस्यानुब्रूयाद्** इति। वाक्यान्तरमध्वरकल्पादिषु—**सप्तदशानुब्रूयाद्**[1] इति। स च गुण इज्याप्रधानो भवति, नेज्या गुणार्थी। किमतो यद्येवं, यत्रेज्या तत्र तद्गुणेन भवितव्यम्। न यत्र गुणस्तत्रेज्यया, वैश्यस्य गुणानुरोधेनेज्याऽपि। त्रयाणां वर्णानामिज्या। सा तत्र [2]गुणमाकाङ्क्षतीति। अपि[3] चेज्यागुणभूतस्यापरा चोदना, न सा वैश्यसंयुक्ता। सा त्ववैश्यकं गुणं प्रत्याययति। प्रथमं सवैश्यकमिति चेन्न, वैश्यस्य प्रधानत्वात्। प्रधानभूतस्तत्र वैश्यः श्रूयते। तस्मात् सर्वाधिकारः ॥३८॥

व्याख्या—यह नहीं है। ये संयोग पृथक् हैं। एक वाक्य है—सप्तदश वैश्यस्यानुब्रूयात् (=सत्रह सामिधेनियां वैश्य की बोलें)। **अध्वरकल्पादि में वाक्यान्तर है—**सप्तदशानुब्रूयात् (=सत्रह बोले) [यहां वैश्य का निर्देश नहीं है]। वह [अध्वरकल्पादि में उक्त साप्तदश्य] गुण इज्याप्रधान है [अर्थात् वहां याग की प्रधानता है] इज्या गुणार्थ नहीं है। इससे क्या यदि ऐसा है? जहां इज्या है (=जिस विषयवाली इज्या है) वहां गुण को होना चाहिये। यह नहीं, कि जहां गुण होवे वहां इज्या होवे। [अर्थात् सप्तदश] गुण के अनुरोध से इज्या भी वैश्य की होवे। [अध्वरकल्पादि]इज्या तीनों वर्णों की है। वह वहां गुण की आकाङ्क्षा करती है। और भी, इज्या की गुणभूत की जो अन्य चोदना है, वह वैश्ययुक्त नहीं है, वह वैश्य-संबन्धरहित गुण का ज्ञान कराती है। (आक्षेप) प्रथम वचन वैश्य सहित को होवे, (समाधान) नहीं, वहां वैश्य के प्रधान होने से। वहां वैश्य प्रधानभूतश्रुत है। इससे [अध्वरकल्पादि में सप्तदश सामिधेनियों का विधान होने पर भी उनमें] सबका अधिकार है।

विवरण—दो भिन्न भिन्न वाक्य हैं। दर्शपौर्णमास में पञ्चदश सामिधेनियों का विधान करके **सप्तदशानुब्रूयाद् वैश्यस्य** से वैश्य की सप्तदश सामिधेनियों का विधान है और अध्वर-कल्पादि में श्रुत **सप्तदशानुब्रूयात्** में वैश्य का संबन्ध नहीं हैं। पूर्व वचन में इज्या को उद्देश करके साप्तदश्य का विधान है और दूसरे [अध्वरकल्पादि में पठित वचन] में इज्या प्रधान है और साप्तदश्य गुणभूत है। इज्या के प्रधान होने से उसमें तीनों वर्णों का अधिकार है। वह इज्या गुण की आकांक्षा करती है। इससे **प्रकृतिवद् विकृतिः कर्तव्या** से सामान्य पञ्चदश सामिधेनियां प्राप्त होती हैं, उनके स्थान में सप्तदश का विधान किया है और उसमें वैश्य का सम्बन्ध न होने से वह साप्तदश्य भी तीनों वर्णों का है। **प्रथमं सवैश्यकम्**—इत्यादि का भाव यह है कि प्रथम **सप्तदशानुब्रूयाद् वैश्यस्य** वचन से साप्तदश्य का संबन्ध वैश्य से होवे। ऐसा होने पर जिस जिस याग में सप्तदश सामिधेनियां होंगी वे वे वैश्य संबद्ध होवें। इसका उत्तर दिया है—**वैश्यस्य प्रधानत्वात्**—**सप्तदशानुब्रूयात् वैश्यस्य** में वैश्य की प्रधानता हैं, वैश्य को उद्देश करके

---

१. अनुपलब्धमूलम्। २. 'सा तत्र गुणमाकर्षतीति' पूनामुद्रिते पाठान्तरम्।
३. 'अपि च या गुणस्यापरा चोदना सा' इति पाठान्तरम्। अयं पाठः स्पष्टतरः।

अथ यदुक्तम्—वैश्यस्तोमे यथा तथेहापीति ?

इज्यायां तद्गुणत्वाद् विशेषेण नियम्येत ॥३९॥ (उ०)

युक्तं तत्र । इज्या वैश्यस्य श्रूयते । तत्र वाचनिकेनैव विशेषेण नियम्येत । तस्मात् तत्रादोष इति ॥३९॥ **श्रुतसाप्तदश्यासु विकृतिषु वर्णत्रयाधिकाराधिकरणम् ॥७॥**

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये
षष्ठस्याध्यायस्य षष्ठः पादः ॥

सप्तदशत्व का वहां विधान है। अध्वरकल्पादि पठित **सप्तदशानुब्रूयात्** वाक्य में वैश्य का संबन्ध न होने पर अध्वरकल्पादि यागों में तीनों वर्णों का अधिकार जानना चाहिये ॥३८॥

व्याख्या—जो कहा **वैश्यस्तोम में जैसे [वैश्य का अधिकार है] वैसे ही यहां भी होवे ?**

इज्यायां तद्गुणत्वाद् विशेषेण नियम्येत ॥३९॥

सूत्रार्थः—(इज्यायाम्) **वैश्यो वैश्यस्तोमेन यजेत** वचनविहित याग में (तद्गुणत्वात्) वैश्यगुणवाला श्रवण होने से (विशेषेण) विशेषरूप से वैश्य में (नियम्येत) नियमित होवे ।

व्याख्या—वहां (=वैश्यस्तोम में) **युक्त है। याग वैश्य का सुना जाता है। वहां वाचनिक विशेष से ही [वैश्य में] नियम होवे। इससे वहां दोष नहीं है।**

षष्ठेऽध्याये सप्तमः पादः

[विश्वजिति सर्वस्वदाने पित्रादीनामदेयत्वाधिकरणम् ॥१॥]

इदमामनन्ति—विश्वजिति सर्वस्वं ददाति[1] इति। तत्र संदेह—किं यावत्किंचित् स्वशब्देनोच्यते, यथा माता पितेत्येवमाद्यपि, तत्[2] सर्वं देयमुत यत्र प्रभुत्वयोगेन स्वशब्दस्तदेव देयमिति ? किं प्राप्तम् ?

स्वदाने सर्वमविशेषात् ॥१॥ (पू०)

अविशेषात् माता पितेत्येवमाद्यपि दातव्यम्। ननु दानमित्युच्यते स्वत्वनिवृत्तिः, परस्वत्वापादनं च। तत्र पित्रादीनामशक्यं स्वत्वं निवर्तयितुम्। न हि

व्याख्या—यह पढ़ते हैं—विश्वजिति सर्वस्वं ददाति (=विश्वजित् में सर्वस्व दान करता है)। उसमें सन्देह होता है—क्या जितना कुछ भी 'स्व' शब्द से कहा जाता है, जैसे माता पिता इत्यादि भी, वह सब देने योग्य है, अथवा जहां स्वामित्व के संबन्ध से 'स्व' शब्द [प्रयुक्त होता है] वही देने योग्य है ? क्या प्राप्त होता है ?

विवरण—विश्वजित् नाम का क्रतु ज्योतिष्टोमविकार अष्टरात्र के आदि में होने वाला है, और स्वतन्त्र भी है। द्र० जैमिनि न्यायाधिकरणमालाविस्तर ६।७ अधि० ८; ७।३ अधि० ३॥ यहां स्वतन्त्र एकाहकाण्डपठित विश्वजित् याग में विहित सर्वस्व दक्षिणा पर विचार किया है। अष्टरात्र के प्रथम दिनवाले विश्वजित् के सम्बन्ध में आगे मी० ६।७।१४-१७ के भाष्य में विचार करेंगे।

स्वदाने सर्वमविशेषात् ॥१॥

सूत्रार्थः—(स्वदाने) स्व के दान में (सर्वम्) सब देय है, (अविशेषात्) विशेष का निर्देश न होने से।

व्याख्या—अविशेष से माता पिता इत्यादि भी देने चाहियें। (आक्षेप) स्व स्वत्व (=अपने स्वामित्व) की निवृत्ति और अन्य के स्वामित्व की प्राप्ति कराना, दान कहा जाता है। उस अर्थ में पिता आदि में स्वत्व का निर्वातत करना अशक्य है। किसी भी प्रकार पिता, पिता नहीं होता है, ऐसा नहीं है [अर्थात् वह सर्वदा पिता ही होता है]। (समाधान) सत्य

---

१. अनुपलब्धमूलम्। द्र०—तृतीये संवत्सरेऽभिजिता विश्वजिता वा यजेत। सर्ववेदसं ददाति॥ आप० श्रौत १७।२६।१२,१३॥

२. 'तत्' पदं क्वचिन्नास्ति।

कथंचित् पिता न पिता भवति । उच्यते । सत्यं नासौ न पिता भवति । शक्यते तु परविधेयः कर्तुम् । परस्वत्वापादनं च दानं 'ददातेरर्थः। अर्थाच्च स्वत्वत्यागः । तस्मात् सर्वं देयमिति ॥१॥

यस्य वा प्रभुः स्यादितरस्याशक्यत्वात् ॥२॥ (उ०)

वाशब्देन पक्षो विपरिवर्तते । यस्य प्रभुत्वयोगेन स्वत्वं तदेव देयं, नेतरत् । कस्मात् ? प्रभुत्वयोगिनः शक्यत्वात् । इतरस्य चाशक्यत्वात् । न हि पित्रादीनां शक्यते स्वत्वं परित्यक्तुम् । ननु चोक्तं परविधेयीकरणं तस्य शक्यमिति । उच्यते । प्रभुत्वयोगिनः स्वस्यात्र दीयमानस्य सर्वत्वमुच्यते । नाप्रभुत्वयोगिनः स्वस्य दानम् । न चैतन्न्याय्यं, यत् पित्रादीनां परिचारकत्वम् । यस्य चैतन्न्याय्यमपि भवेत् स दद्यादपि ।

अत्राऽऽह । ननु यत्र स्वशब्दो वर्तते तद् देयमित्युक्ते पित्रादयो दातव्या गम्य-

---

है, वह पिता नहीं होता है, ऐसा नहीं है । परन्तु परविधेय दूसरे का आज्ञाकारी तो किया जा सकता है । अन्य के स्वत्व की प्राप्ति कराना ही 'ददाति' का अर्थ है । अर्थसामर्थ्य से स्व-स्वत्व का त्याग होता है । इससे सर्वस्व देय है ॥१॥

यस्य वा प्रभुः स्यादितरस्याशक्यत्वात् ॥२॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्व उक्त पक्ष की निवृत्ति करता है । दान देने वाला व्यक्ति (यस्य) जिस का (प्रभुः) स्वामी (स्यात्) होवे, उसे सर्वस्व दान में देवे । (इतरस्य) दूसरे के=जिसका वह स्वामी नहीं है, उसके दान में (अशक्यत्वात्) अशक्य=असमर्थ होने से नहीं दे सकता ।

व्याख्या—'वा' शब्द से पक्ष परिवर्तित होता है । जिसका स्वामित्व के संबन्ध से स्वत्व है, वही देने योग्य है, अन्य [देने योग्य] नहीं है । किस हेतु से ? प्रभुत्व के सम्बन्ध वाले [स्वत्व] का [देना] शक्य (=सम्भव) होने से, और अन्य का देना अशक्य होने से । पिता आदि का स्वत्व (=स्व-संबन्ध) छोड़ा नहीं जा सकता है । (आक्षेप) पूर्व कहा है—पर का आज्ञाकारी बनाया जाना तो सम्भव है । (समाधान) स्वामित्व सम्बन्धी दीयमान स्ववस्तु का ही यहां सर्वत्व कहा जाता है । जिसका स्वामित्व संबन्ध नहीं है, ऐसी स्ववस्तु का दान नहीं कहा जाता है । यह न्याय्य भी नहीं है, जो पिता आदि का परिचारकत्व (=सेवकत्व) है । जिसका यह न्याय्य होवे सो दे भी सकता है ।

व्याख्या—(आक्षेप) जहां 'स्व' शब्द प्रयुक्त होता है वह देय है, ऐसा कहने पर पिता आदि भी देने योग्य हैं, ऐसा जाना जाता है । इससे, उनके प्रति स्वामित्व के लिये स्मृति को

---

१. 'ददातेरर्थः' क्वचिन्नास्ति ।

न्ते । तस्मात् तान्प्रति प्रभुत्वाय स्मृतिं बाधित्वाऽपि यतितव्यमिति । अत्रोच्यते । स्वशब्दोऽयमात्मीयधनज्ञातीनां प्रत्येकं वाचको न समुदायस्य । तत्राऽऽत्मीये सर्वतायां कृतायां कृते शास्त्रार्थे, न[1] अशक्येषु ज्ञातिषु सर्वता कल्पनीया, नापि स्मृतिर्बाधितव्या । अपि च, गवादीनामात्मीयानां चोदकेन प्राप्तौ सत्यामवश्यमात्मीयगता सर्वतोपादेया तस्यां चोपात्तायां कृतः शास्त्रार्थं इति ज्ञातीनामुपादाने न किञ्चित् कारणमस्ति । तस्मान्न [2]पित्रादयो देयाः । तस्माद् यत्रैव प्रभुत्वयोगेन स्वत्वं, तदेव देयमिति ॥२॥

[विश्वजिति भूमेरदेयत्वाधिकरणम् ॥२॥]

अत्रैव सर्वदाने संशयः—किं भूमिर्देया नेति ? का पुनर्भूमिरत्राभिप्रेता ? यदेतन्मृदारब्धं द्रव्यान्तरं पृथिवीगोलकं नाम[3], न क्षेत्रमात्रं मृत्तिका वा । तत्र किं प्राप्तम् ? अविशेषाद् देया । प्रभुत्वसंबन्धेन हि तत्र स्वशब्दो वर्तते, शक्यते च मानसेन व्यापारेण [4]स्वस्वत्वं निवर्तयितुमिति । एवं प्राप्ते ब्रूमः—

बाधकर भी [देने के लिये] यत्न करना चाहिये । (समाधान) यह स्वशब्द आत्मीय (=अपना), धन और सम्बन्धी प्रत्येक का वाचक है, समुदाय का वाचक नहीं है । ऐसी अवस्था में आत्मीय [द्रव्य की] सर्वता कर देने पर शास्त्रार्थ (=शास्त्रप्रयोजन) के कृत (=सम्पन्न) हो जाने पर अशक्य जो सम्बन्धी हैं उनमें सर्वता की कल्पना नहीं करनी चाहिये । और नाही स्मृति बाधने योग्य है । और भी गवादि आत्मीयों की चोदकवचन से प्राप्ति होने पर अवश्य ही आत्मीयगत सर्वता उपादेय (=ग्रहण योग्य) होवे । उससे ग्रहण करने पर शास्त्र का तात्पर्य पूर्ण हो जाता है, इससे सम्बन्धियों के ग्रहण में कोई कारण नहीं है । इससे पिता आदि देय नहीं हैं । इसलिये जहां प्रभुत्व के योग से स्वत्व है, वही देने योग्य है ॥२॥

व्याख्या—इसी सर्वदान में संशय होता है— क्या भूमि देने योग्य है वा नहीं ? यहां कौन सी भूमि अभिप्रेत है ? जो यह मिट्टी से बना हुआ पृथिवीगोलक नाम वाली द्रव्यान्तर [अभिप्रेत है], क्षेत्रमात्र अथवा मिट्टी [अभिप्रेत] नहीं है । उसमें क्या प्राप्त होता है ? विशेष का निर्देश न होने से (भूमि) देय है । स्वामित्व के सम्बन्ध से ही उसमें स्वशब्द व्यवहृत होता है, और मानस व्यापार से अपना स्वत्व (=स्वामित्व) हटाया जा सकता है । ऐसा प्राप्त होने पर कहते हैं—

---

१. 'अशक्यज्ञातिषु' इति पाठान्तरम् । २. 'मातापित्रादयः' इति पाठान्तरम् ।
३. 'नाम' पदं काशीमुद्रिते नास्ति । ४. 'स्वस्य स्वता' इति काशीमुद्रिते पाठः ।

न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात् ॥३॥ (उ०)

न भूमिर्देयेति । कुतः ? क्षेत्राणामीशितारो मनुष्या दृश्यन्ते, न कृत्स्नस्य पृथिवीगोलकस्येति । आह । य इदानीं सार्वभौमः स तर्हि दास्यति । सोऽपि नेति ब्रूमः । कुतः ? यावता [1]भोगेन सार्वभौमो भूमेरीष्टे, तावताऽन्योऽपि । न तत्र कश्चिद्विशेषः । सार्वभौमस्य त्वेतदधिकं, यदसौ पृथिव्यां संभूतानां व्रीह्यादीनां रक्षणेन निर्विष्टस्य कस्यचिद्भागस्येष्टे, न भूमेः तन्निर्विष्टाश्च ये मनुष्यास्तैरन्यत् सर्वप्राणिनां [2]धारणचंक्रमणादि यद्भूमिकृतं, तत्रेशित्वं प्रति न कश्चिद् विशेषः । तस्मान्न भूमिर्देया[3] ॥३॥ **विश्वजिति भूमेरदेयत्वाधिकरणम् ॥३॥**

न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात् ॥३॥

सूत्रार्थः—(भूमिः) भूमि देय (न) नहीं (स्यात्) होवे, (सर्वान् प्रति) सब के प्रति (अविशिष्टत्वात्) सामान्य होने से (=सब की साझी होने से) ।

व्याख्या—भूमि देय नहीं है । किस हेतु से ? खेतों के स्वामी मनुष्य देखे जाते हैं । सम्पूर्ण पृथिवीगोलक के नहीं [देखे जाते हैं] । (आक्षेप) जो सार्वभौम [राजा] है वह देगा (=भूमि का दान करेगा)। (समाधान) वह भी नहीं देगा, ऐसा हम कहते हैं । किस हेतु से? जितने भोग से सार्वभौम राजा भूमि का स्वामी होता है उतने से अन्य भी स्वामी होता है । उसमें कुछ विशेष नहीं है । सार्वभौम राजा का यह अधिक है, जो यह पृथिवी में उत्पन्न हुए व्रीहि आदि के रक्षण से प्राप्त किसी भाग का स्वामी होता है, उसमें रहने वाले जो मनुष्य हैं उनसे, सब प्राणियों के धारण गमन आदि जो अन्य भूमिकृत [व्यापार है] उसमें स्वामित्व के प्रति कोई विशेष नहीं है । इससे भूमि देय नहीं है ।

विवरण—**यावता भोगेन**—इसका पाठान्तर है—**यावता भूमिभागेन** । इसका अर्थ होगा—जितने भूमि के भाग से । **निर्विष्टस्य**—निर्विष्ट का अर्थ है—प्रविष्ट, प्राप्त और स्थिर । **धारणचङ्क्रमणादि**—इसका पाठान्तर है—**धारणविक्रमणादि** । विक्रमण का अर्थ भी पादविक्षेप अर्थात् चलना ही है ।

विशेष—कुतूहलवृत्ति में लिखा है—भूमि गोपथ (=पगदण्डी) राजपथ (=सड़क) जलाशय, वन, पर्वत आदि से युक्त होती है । इस प्रकार की भूमि पर किसी का स्वामित्व

---

१. 'यावता भूमिभागेन' इति पूनामुद्रिते पाठः ।
२. 'धारणविक्रमणादि' इति काशीमुद्रिते पाठः ।
३. 'नभूमेर्दानम्' इति पाठान्तरम् ।

[विश्वजिति अश्वादीनामदेयत्वाधिकरणम् ॥३॥]

विश्वजित्येव संदेहः—किमश्वादयो देया नेति ? किं प्राप्तम् । सर्वस्य विहितत्वाद् देया अश्वा इति । एवं प्राप्ते ब्रूमः—

अकार्यत्वाच्च ततः पुनर्विशेषः स्यात् ॥४॥ (उ०)

यस्य च दानमकार्यं, तच्च न देयम् । यथाऽश्वानाम् । तेषां हि दानमकार्यम् । एष हि विशेषोऽश्वानामन्येभ्यो द्रव्येभ्यो यदेषां दानं प्रतिषिध्यते—**न केसरिणो ददाति[1], नोभयतोदतः प्रतिगृह्णाति[2]** इति विश्वजित्येव समाम्नायते । तस्मान्नाश्वा देया इति ॥४॥ विश्वजिति अश्वादीनामदेयत्वाधिकरणम् ॥४॥

———

नहीं होता है, [राजा का कार्य केवल] कण्टक उद्धरणमात्र है । उस भूमि से (अथवा—कण्टकोद्धरण से) उत्पन्नफल का ग्रहण ही राजा का भूमि के प्रति स्वामित्व है । गोपथ आदि में साधारण होने से ॥३॥

———

व्याख्या—विश्वजित् में ही सन्देह होता है—क्या अश्व आदि देय हैं वा देय नहीं हैं । क्या प्राप्त होता है ? सर्वस्व [दान] के विहित होने से अश्व आदि देय हैं । ऐसा प्राप्त होने पर कहते हैं—

अकार्यत्वाच्च ततः पुनर्विशेषः स्यात् ॥४॥

सूत्रार्थः—अश्व (अकार्यत्वात्) अकार्य=निषिद्ध होने से (च) भी देय नहीं होता है । (ततः) इतरधन से (विशेषः) विशेष भेद (स्यात्) होवे ।

विशेष—सूत्रार्थ में पुनः पद का सम्बन्ध जोड़ना रह गया है ।

व्याख्या—जिसका दान कार्य अकार्य (=प्रतिषिद्ध) होवे वह भी देय नहीं होता है । जैसे अश्वों का । उन (अश्वों) का दान प्रतिषिद्ध है । यही अश्व का द्रव्यों से विशेष है जो इनका दान प्रतिषिद्ध किया जाता है—न केसरिणो ददाति (=केसरी=घोड़ों को नहीं देता है), न उभयतोदतः प्रतिगृह्णाति (=दोनों ओर=ऊपर नीचे दांत वालों का प्रतिग्रह नहीं करता है) । यह विश्वजित् में ही पढ़ा गया है । इससे अश्व देय नहीं हैं ।

विवरण—केसरिणः—केसर घोड़े के कन्धे के बालों को कहते हैं । उस से मत्वर्थ (=

---

१. अनुपलब्धमूलम् । २. अनुपलब्धमूलम् ।

[विश्वजिति विद्यमानस्यैव स्वत्ववतः सर्वस्य दानाधिकरणम् ।।४।।]

विश्वजित्येव संदेहः—सर्वस्वं ददाति इति । किमर्जयित्वोपकरणानि यावन्ति मनुष्यस्य, यावन्ति च शक्नोत्युपार्जयितुं, सर्वाणि तानि दद्यात् [1]कृतभाण्डकानि, उत यान्येवास्य विद्यन्ते तानि सर्वाणि देयानि, नाविद्यमानानि कर्तव्यानीति ? कुतः संशयः ? उभयथा वचनव्यक्तेः संभवात् । यदि वैवं वचनं व्यज्यते—यानि सर्वाणि स्वानि । कानि तानि; यानि पुरुषस्योपकारकाणि शयनादीनि, तानि सर्वाणि दद्यादिति विधीयते, यद्वा यानि स्वानि पुरुषस्य दाने शक्यानि, तानि सर्वाणीति सर्वत्वं विधीयते । यदि दानं विधीयते, ततोऽप्राप्तदानानां कृतभाण्डकानामपि दानम् । अथ सर्वता[2] विधीयते, ततो विद्यमानानामेव । किं तावत् प्राप्तम् ? कृतभाण्डकानि देयानीति । तथा दानविधाने श्रुतिरनुगृह्यते । इतरथा वाक्यम् । तयोश्च श्रुतिर्बलीयसी । तस्मात् कृतभाण्डानि देयानीति । एवं प्राप्ते ब्रूमः—

केसर जिनके हैं) में इनि प्रत्यय होता है (द्र० कुतूहलवृत्ति) लोक में 'केसरी' शब्द सिंह के लिये प्रसिद्ध है ।।४।।

———

व्याख्या—विश्वजित् में ही सन्देह होता है—सर्वस्वं ददाति (=सर्वस्व देता है) । क्या मनुष्य के जितने उपकरण (=कार्य में आने वाले पदार्थ) उनको इकट्ठा करके अथवा जितने इकट्ठे किये जा सकते हैं उन सब कृतभाण्डकों (स्वोपार्जित पदार्थों) को देवे अथवा जो ही पदार्थ इसके [पास] विद्यमान हैं । वे सब देय हैं ? अविद्यमान [पदार्थों] का [अर्जन] नहीं करना चाहिये । किस कारण यह संशय होता है ? दोनों ही प्रकार से वचन व्यक्ति (=वचन के स्वरूप) के संभव होने से । यदि इस प्रकार वचन स्वरूप होता है—यानि सर्वाणि स्वानि (जो सब अपने) । वे कौन से हैं ? जो पुरुष के उपकारक पलङ्ग आदि वे सब देवे, ऐसा विधान किया जाता है अथवा यानि स्वानि (=जो अपने) पुरुष के दान में शक्य हैं (=दिये जा सकते हैं), उन सबको, इसमें सर्वत्व का विधान किया जाता है । यदि दान का विधान किया जाता है तो उससे अप्राप्त दान वाले कृतभाण्डकों का भी दान प्राप्त होता है । यदि सर्वता का विधान करते हैं तो उससे विद्यमान पदार्थों की ही प्राप्ति होती है । क्या प्राप्त होता है ? कृतभाण्ड भी देय हैं । इस प्रकार दान के विधान में 'ददाति' श्रुति अनुगृहीत होती है । अन्यथा (=सर्वत्व के विधान में) वाक्य अनुगृहीत होवे । उन दोनों में श्रुति बलवती है । इस से कृतभाण्डकादि देय हैं । ऐसा प्राप्त होने पर कहते हैं—

---

१. 'कृतभाण्डानि' इति काशीमुद्रिते पाठः । एवमुत्तरत्र पूर्वपक्षे । समाधानसूत्रभाष्ये तु काशीमुद्रितेऽपि 'कृतभाण्डक' शब्द एव प्रयुज्यते ।

२. 'अथ तानि सर्वाणीति सर्वता' इति पाठान्तरम् ।

नित्यत्वाच्चानित्यैर्नास्ति संबन्धः ॥५॥ (उ०)

नित्यत्वाच्चानित्यैर्नास्ति संबन्धः । चशब्दोऽन्वादेशे । नाश्वा दातव्या इत्युक्तम् । कृतभाण्डकानि च न देयानीति । नित्यं हि विश्वजिति दानं चोदकेन प्राप्तमनूद्यते । अनित्यानि च कृतभाण्डकानीति न शक्यानि सर्वाणि विश्वजिति क्रियमाण उपसंहर्तुम् । तत्र कृतभाण्डकानां केषांचिदुत्पत्तिं विश्वजिति दानं प्रतीक्षेत । नैमित्तिकं तत् स्यान्न नित्यम् । नित्यवच्च तच्चोदकेन विधीयते, न निमित्तसंयोगेन । मादवश्यमेतदभ्युपगन्तव्यं, साकल्यं देयानां प्राप्तानां विधीयत इति । श्रुत्यसंभवे च वाक्यार्थो ग्रहीतव्य एव भवति । तस्मान्न कृतभाण्डकानि दातव्यानि ॥५॥

विश्वजिति विद्यमानस्यैव स्वत्ववतः सर्वस्य दानाधिकरणम् ॥४॥

विवरण—**कृतभाण्डकानि**—इसका पाठान्तर है—**कृतभाण्डानि** । यह पद हमें अन्यत्र कोशादि में कहीं उपलब्ध नहीं हुआ । अतः प्रकरण के अनुरोध से हमने जो अर्थ समझा है वह ऊपर दिया है । मीमांसा का अध्ययन करते समय कृतभाण्ड (कृतभाण्डक) का अर्थ (**'संपाद्यमानानि'** पृष्ठ के (हाशिये) पर लिखा हुआ है ।

नित्यत्वाच्चानित्यैर्नास्ति सम्बन्धः ॥५॥

